श्री दीपलक्ष्मी स्तोत्रं

दीपस्त्वमेव जगतां दयिता रुचिस्ते,
दीर्घं तमः प्रतिनिवृत्यमितं युवाभ्यां।
स्तव्यं स्तवप्रियमतः शरणोक्तिवश्यं
स्तोतुं भवंतमभिलष्यति जंतुरेषः ॥

दीपः पापहरो नृणां दीप आपन्निवारकः
दीपो विधत्ते सुकृतिं दीपस्संपत्प्रदायकः।
देवानां तुष्टिदो दीपः पितृणां प्रीतिदायकः
दीपज्योतिः परंब्रह्म दीपज्योतिर्जनार्दनः ॥

दीपो हरतु मे पापं संध्यादीप नमोऽस्तु ते ॥

फलश्रुतिः
या स्त्री पतिव्रता लोके गृहे दीपं तु पूरयेत्।
दीपप्रदक्षिणं कुर्यात् सा भवेद्वै सुमंगला ॥

इति श्रीदीपलक्ष्मीस्तोत्रं संपूर्णं।